योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ११३

अज्ञातलेखकः

त्रयोदशाधिकशततमः सर्गः ११३

श्रीवसिष्ठ उवाच ।

बलान्यनुतरन्तोऽथ तदित्थं द्रवतां द्विषाम् ।

दूराद्दूरतरं प्राप्ताश्चत्वारस्ते विपश्चितः ।। १

सर्वशक्तिमयैकेन चेतनेनेश्वरेण ते ।

प्रहिता दिग्जयं चक्रुः सर्व एव समाशयाः ।। २

दूरात्तावदविच्छिन्नमनुसस्रुर्बलानि ते ।

यावत्तीरं समुद्राणां प्रवाहाः सरितामिव ।। ३

दूराविश्रान्तयानेन तेषां तत्सर्वसाधनम् ।

आत्मीयं परकीयं च क्षीणं कुसरिदम्बुवत् ।। ४

आत्मीयान्यन्यदीयानि तेषां वीक्ष्यबलान्यलम् ।

क्षीणानीव मुमुक्षूणां पुण्यपापानि धावताम् ।। ५

स्वयमस्त्राणि शान्तानि कृतकृत्यान्यथाम्बरे ।

ज्वालाजालानि वह्नीनां दाह्यस्यासंभवादिव ।। ६

आलयेषु रथाश्वेभवृक्षौघादिषु हेतयः ।

आसन्निद्रालवो लीना दिनान्ते विहगा इव ।। ७

तरङ्गा इव तोयेऽन्तर्नीहारा इव वारिदे ।

मेघा वायाविवामोदा व्योमनीव निलिल्यिरे ।। ८

धारापङ्कतलालीनशान्तहेतिजलेचरः ।

नाराचसीकरासारनीहारपरिवर्जितः ।। ९
चक्रावर्तशतोन्मुक्तो युक्तः सौम्यतयाच्छया ।
प्रशान्तमेघसंरम्भतरङ्गोत्तुङ्गवर्षणः ।। १०
अन्तर्लीनर्क्षरत्नौघकोणसंस्थार्कवाडवः ।
शून्यतावारिरमलो व्योमैकाब्धिरभूत्पृथुः ।। ११
लम्बप्रकाशगम्भीरं प्रसन्नं कान्तिमत्ततम् ।
रजोविरहितं रेजे खं मनो महतामिव ।। १२
अथार्णवांस्ते ददृशुराकाशस्यानुजानिव ।
विस्तीर्णान्विमलाकारान्पूरिताखिलदिक्तटान् ।। १३
तरङ्गकणकल्लोलमहागुलुगुलाकुलान् ।
भूरिसीकरनीहारहारिहारिशरीरिणः ।। १४
स्थितानात्मानमास्तीर्य भूमौ व्याध्यातुरानिव ।
श्वसनार्तांश्चलद्देहान्विवर्तोर्मिमहाभुजान् ।। १५
जडानपि स्पन्दमयान्कल्लोलाकोटकोटरान् ।
संसारानिव विस्तीर्णांश्चक्रावर्तदशाकुलान् ।। १६
रत्नराशितटोद्द्योतपीवरीकृतभास्करान् ।
शङ्खराशिविशद्वातशब्दतर्जितघुंघुमान् ।। १७
मांसलोर्मिघटाघोषघर्घराम्बरडम्बरान् ।
वर्तुलावर्तविस्तारप्रभ्रमद्विद्रुमद्रुमान् ।। १८
मकरव्यूहनिर्ह्लादघर्घरोदरघुंघुमान् ।
मत्स्यपुच्छच्छटाच्छिन्नमज्जत्पोतकृतारवान् ।। १९
उद्ग्रीवकूर्ममकरनिगीर्णोर्णनरोत्करान् ।
ऊर्मिबिम्बितसप्ताश्वसहस्रार्कनभोनिभान् ।। २०
भांकारकारिपवनपतद्भूत्यततोद्धटान् ।
ऊर्म्युदस्तमणिव्रातबलाज्झणझणध्वनीन् ।। ५९
नानाजालैर्बलभुजैर्हेलास्पृष्टार्कमण्डलान् ।

नमदुन्नमदुद्रश्मिरत्नमाणिक्यमण्डलान् ।। २२
उत्फालफेनिलावर्तविवर्तमकरोत्करान् ।
क्वचित्करिकरोन्नामैः क्षणं वंशवनीकृतान् ।। २३
लहरीवल्लरीवालान्पृष्ठतालिषु माधवान् ।
क्वचिदन्तरविश्रान्तसपरिच्छदमाधवान् ।। २४
एकदेशस्थितासंख्यनानासुरसुरालयान् ।
तारानवतरङ्गौघपरिदन्तुरिताम्बरान् ।। २५
गुहामशकवद्गर्तभीतशाखायिताचलान् ।
नयतोम्बुतरङ्गौघैर्वेलाद्रीनतिखर्वताम् ।। २६
खक्षेत्रारोपितानल्परत्नरश्मिपथाङ्कुरान् ।
शुद्धशुक्तिमुखोन्मुक्तमुक्तान्तरितसैकतान् ।। २७
नानारत्नांशुकौशेयसूत्रचित्रांस्तरङ्गितान् ।
विशन्नदीन्दशादिग्भिः समाकीर्णान्पटानिव ।। २८
इन्द्रनीलतटैर्व्युप्तमुक्ताशुक्तिशताङ्कितैः ।
क्वचिद्दर्शयतः कान्तशतेन्दुकनखश्रियम् ।। २९
रत्नांशुजालसंदिग्धास्तरङ्गादेशबिम्बिताः ।
परिवर्तयतः फुल्लास्तीरतालीवनावलीः ।। ३०
एलालवङ्गकङ्कोलफलमालां जिघृक्षुभिः ।
वेलावनलताभ्रष्टामात्तावृत्तीञ्जलेचरैः ।। ३१
चूतनीपकदम्बाग्रविहगान्प्रतिबिम्बितान् ।
भुञ्जानैर्विप्रलम्भेन कृताच्छोटाञ्जलेचरैः ।। ३२
खेचरप्रतिबिम्बेन विद्रवद्भिरितस्ततः ।
भग्नबन्धबृहत्सेतून्क्षणं प्रति जलेचरैः ।। ३३
अमूर्तान्प्रतिबिम्बेन हृदयस्थजगत्त्रयान् ।
चतुरो व्योमविपुलान्दिक्षु नारायणानिव ।। ३४
अतिगाम्भीर्यनैर्मल्यविस्तारविभवैर्नभः ।

निगीर्य संदर्शयतो हृदयादिव बिम्बितम् ।। ३५

जलचारिविहङ्गानां साकाशं प्रतिबिम्बितम् ।

आशयैर्दधतः सारैः पद्मान्भृङ्गमिवात्मगम् ।। ३६

तरङ्गतरलास्फालमारुतैराहताम्बरान् ।

कन्दरोद्गारगम्भीरैः कल्पान्तजलदालयान् ।। ३७

गुहागुलुगुलावर्तनिर्घोषाशनिभाषणान् ।

भृशं भावयतो ग्रस्तानगस्त्यौर्वानलानिव ।। ३८

भूरिसीकरपुष्पाणि तरङ्गौघतरूणि च ।

प्राप्तान्यम्बुवनानीव लहरीमञ्जरीणि खम् ।। ३९

सरत्तरङ्गजालानि प्रोड्डीनप्राणिमन्त्यधः ।

आकाशखण्डखण्डत्वात्पतितानीव विभ्रमात् ।। ४०

एलालवंगबकुलामलकीतमाल-

हिंतालतालदलताण्डवखण्डिताग्रे ।

प्राप्ते पतल्लवणवारिधिदीर्घतीरं

रेखा बभावलिनिभाम्बरशैलमूर्ध्नि ।। ४१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वा० उ० अवि० विप० समुद्रवर्णनं नाम

त्रयोदशाधिकशततमः सर्गः ।।११३।।